शास्त्री-II साहित्य तृतीय-पत्रम्

रघुवंशमहाकाव्यम् – द्वितीयः सर्गः

Date ___/___/___

प्र०(1) – पद्यमिदम् व्याख्येयम् ।

कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम् ।
इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयाऽस्याम् ॥

उत्तरम् – प्रसंगः – प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीयः सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राजा दिलीपः सिंहं प्रति कथयति हे मृगेन्द्र! अन्यगवां प्रदानेन गुरोः क्रोधः कथमपसरेत्? नेयं नन्दिनी दुग्धमात्रप्रदात्री गौः, अपितु एषा कामधेनुसमानानुभावा कामदोग्ध्री । अस्याः तुलनां किमन्याः पयस्विन्य अर्हन्ति?, यां गुरवे प्रदाय तं प्रसादयेयं । त्वत्कृतोऽस्यां प्रहारस्तु भगवतो रुद्रस्य प्रभावादेव जातः । अतोऽस्या महानुभावत्वे न भवता शङ्कितव्यम् ।

व्याख्या – महर्षेः = वसिष्ठस्य, अनुनयः = कोपप्रसादनं, च = वा अन्यपयस्विनीनां = अपरासां भूरिक्षीराणां कोटिघटोध्नीनाम्, विश्राणनात् = दानात्, कथं नु शक्यः = कथङ्कारं शक्यः न शक्य इत्यर्थः, यत इमां = नन्दिनीम्, सुरभेः = कामधेनोः अनूनां = अहीनम्, अवेहि = जानीहि, त्वया = सिंहेन, अस्यां = नन्दिन्याम्, प्रहृतं तु = प्रहारस्तु, रुद्रौजसा = शिवमहिम्ना महादेवप्रभावेण वा ।

Renu Devi
29/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.

शास्त्री - II साहित्य

रघुवंशमहाकाव्यम्
त्रयोदशः सर्गः

Date __/__/__

प्र०(1) पद्यमिदम् व्याख्येयम् ।

पक्षच्छिदा गोत्रभिदात्तगन्धाः शरण्यमेनं शतशो महीध्राः ।
नृपा इवोपप्लविनः परेभ्यो धर्मोत्तरं मध्यममाश्रयन्ते ॥

उत्तरम् - प्रसङ्गः — प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य त्रयोदश सर्गात् उद्धृतोऽस्ति ।

प्रस्तुत श्लोके पर्वतपक्षशातनायोद्यतेन महेन्द्रेणाभिभूता भयोद्विग्ना बहवः पर्वता एनमेव समुद्रं राजानो धर्मप्रधानं मध्यमभूपालमिवाश्रयन्ते । मध्यमभूपालस्य लक्षणं कुर्वता कामन्दकेन स्वनीतिसारे प्रोक्तमस्ति यत् शत्रुविजयाभिलाषिणोः नृपयोः देशस्य समीपवर्ती राजा मध्यमो भूपालः प्रोच्यते अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः ।

व्याख्या — पक्षच्छिदा = पक्षच्छेदनतत्परेण । गोत्रभिदा = गिरिविदारकेन इन्द्रेण । आत्तगन्धाः = हृतगर्वा, हृताहङ्काराः । महीध्राः = कुध्राः, गिरयः । शरण्यम् = रक्षणसमर्थम् । एनम् = अमुमेव समुद्रम् । परेभ्यः = शत्रुभ्यः । उपप्लविनः = भयवन्तः । नृपाः = राजानः । धर्मोत्तरम् = धर्मप्रधानम् । मध्यमभूपालमिव आश्रयन्ते = अवलम्बन्ते ।

Renu Devi
29/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया

Page No. ____

शास्त्री-I

साहित्य

अभिज्ञानशाकुन्तलम्

पञ्चमोऽङ्कः

Date ___/___/___

इदमुपनतमेव रूपमक्लिष्टकान्ति
प्रथमपरिगृहीतं स्यान्न वेति व्यवस्यन् ।
भ्रमर इव विभाते कुन्दमन्तस्तुषारं
न च खलु परिभोक्तुं नैव शक्नोमि हातुम् ॥

उत्तरम् = प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम् नाट्यकाव्यस्य पञ्चमोऽङ्कात् उद्धृतोऽस्ति।

अस्मिन् श्लोके अथ मुनिकुमाराभ्यां सह कुलपतिना कण्वेन प्रेषितां स्वसमीपे समागतां शकुन्तलामवलोकयापि दुर्वाससः शापकारणेन तिरोहितस्मृती राजा दुष्यन्तः संजातमनोविकारो विमृशति -

व्याख्या - एवं = इत्थम्, उपनतं = अप्रयत्नप्राप्तम् अक्लिष्टकान्ति - न क्लिष्टा = म्लाना कान्तिः लावण्यं यस्य तत् अक्लिष्टकान्ति = परिपूर्ण लावण्यम्, निर्दोषसौन्दर्यम्, इदं = पुरोवर्ति रूपं = आकृतिः प्रथमं = पूर्वं परिगृहीतं गान्धर्वविवाहविधिना पत्नीत्वेन स्वीकृतमिति प्रथम परिगृहीतम् स्यात् = भवेत्, न वा = अथवा न परिगृहीतं वा स्यात् इति = इत्थं अध्यवस्यन् = वितर्कयन् अन्यतरपक्षत्वेन निश्चयम् भजमान इत्यर्थः। अहं विभाते = प्रभाते भ्रमरः मधुपः अन्तस्तुषारं अन्तः = अभ्यन्तरे तुषारः = हिमं यस्य तत् अन्तस्तुषारं = नीहारगर्भम् कुन्दमिव = निशि-विकासि कुन्दाख्यपुष्पमिव सपदि = सहसा नैव हातुं = नैव परिहातुं न च भोक्तुं = न च स्वीकारपूर्वकमुपभोगं कर्तुं शक्नोमि = समर्थोऽस्मि खलु निश्चयेन। पूर्वमियं ललना कदाचित् मया उपभुक्ता नवेति विचारयन् तुषारजडं कुन्दपुष्पं भ्रमर इवाहं परिभोक्तुं त्यक्तुं वा न शक्नोमि ।

Renu Devi

राधा उमाकान्त सं० महाविद्यालय, सुखसेना, पूर्णिया । 29/08/20

Page No.

उपशास्त्री-I साहित्य तृतीय-पत्रम्

रघुवंशमहाकाव्यम्-द्वितीयः सर्गः

Date ___/___/___

प्र० (1) पद्यमिदम् व्याख्येयम् ।

तामन्तिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः
क्रमेण सुप्तामनुसंविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् ।

उत्तरम् - प्रसंगः- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके रात्रौ सुदक्षिणासहितो राजा दिलीपः नन्दिनीनिकटे प्रदीपोपहारान् संस्थाप्य तत्समीपे एवावस्थितः । निद्राकाले च सुप्तायां तस्य सुप्वाप पुनरुत्थितायां च तस्यां समुत्तिष्ठत ।

व्याख्या - गोप्ता = प्रजापालको राजा दिलीपः, गृहिणीसहायः = स्वधर्मपत्नीसहितः सन्, अन्तिकन्यस्तबलिप्रदीपां = समीपस्थापितोपहाररक्षादीपाम्, ताम् = निषण्णां नन्दिनीम् अन्वास्य = अनूपविश्य, तन्निकटे स्थित्वा, क्रमेण = यथाक्रमम्, सुप्तां = निद्रिताम्, अनु = पश्चात्, संविवेश = सुष्वाप, प्रातः = प्रभाते च, सुप्तोत्थिताम् = जागरिताम्, अनु = पश्चात्, उदतिष्ठत् = उत्तस्थौ ।

Ranju Devi
29/08/20
रघ्वा उमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

Page No.